श्री रामेश्वर (त्रिक) आश्रम

श्रीनगर कश्मीर

आरती

अगाध संशयाम्बोधि समुत्तारणतारिणीम्
वन्दे विचित्रार्थपदां चित्र गंतां गुरुभारतीम् ।।
अनाधायाखिलाधाय मायिने गतमायिने ।
अरूपाय सरूपाय शिवाय गुरवे नमः ।।
अखण्डमण्डलाकारं व्याप्तं येन च राचरम् ।
तत्पदं दर्शितं येन तस्मै श्री गुरवे नमः ।।
अज्ञानतिमिरान्धस्य ज्ञाना जन शलाकया ।
चक्षुरुन्मीलितं येन तस्मै श्री गुरवे नमः ।।
आ ब्रह्मस्तम्ब पर्यन्तं यस्य मे गुरु सन्तति : ।
तस्य मे ई सर्वशिष्यस्य को न पूज्यो महीतले ।।
गुरु ब्रह्मा गुरु विष्णू : गुर : साक्षान्महेश्वर : ।
गुरु रेव जगत्सर्वं तस्मै श्री गुरवे नमः ।।
नमामि सद्गुरुं शान्तं प्रत्यक्षं शिवरूपिणम् ।
शिरसा योगपीठस्थं धर्मकाम र्थ सिद्धये ।।
ध्यानमूलं गुरोमूर्ति : पूजा मूलं गुरो : पदम् ।
शास्त्र मूलं गुरोर्वाक्यं मोक्ष मूलं गुरो : कृपा ।।
यस्योन्मेषनिमेषाभ्यां जगतः प्रलयौ दयौ ।
तंशक्ति चक्रविभव प्रभवं शङ्करंस्तुम : ।।

नमः शिवाय सततं पञ्चकृत्य विधायिने ।
चिदानन्दघने स्वात्म परमार्थविभासिने ।।
अकुलस्यास्य देवस्य कुल प्रतिशालिनी ।
कौलिकी सा परा शक्तिरवियुक्तो यया प्रभु ।
चतुर्दशायुतं मन्त्रैः तिथीशान्त समन्वितम् ।
तृतीयं ब्रह्म सुश्रोणि ! हृदयं भैरवात्मनः ।।
आ अन्तरहितं बीजं विसर्गाधि मध्यगम् ।
हृत्पद्मान्तर्गत ध्यायेत सौ भाग्यं नित्यमभ्यसेत् ।।
रक्षणीयं वर्धनीयं बहुमान्यमिदं प्रभो ।
संसार दुर्गतिहरं भवभक्ति महाधनम् ।।
सर्वाशङ्काशनि सर्वलक्ष्मी कालानल तथा ।
सर्वमुल्लङ्घ्य कल्पान्तं मार्ग माहेश्वरं नमः ।।
यस्मिन्सर्वं यतः सर्वं यः सर्वं सर्वतश्चर्यः ।
यश्चसर्वमयो ऽत्यंतस्मै सर्वात्मने नमः ।।
तद्देवता विभवभावि महामरीचि चक्रेश्वरायत-
निजस्थितिरेक स्वा देवी सुतो गणपतिः स्फुरदि
न्दुकान्तिः सम्यक् समुच्छलयतान्ममसंविद -
दिवेम् । विश्वत्र भाव पटले प्रविजृम्भमाण

विच्छेद शून्य परमार्थ चमत्कृतियां । तां पूर्ण -
वत्यहमिति प्रथन स्वभावां स्वात्मस्थितिं स्व -
रसतः प्रणमामि देवीमे ।। चेतन्य पूरितमिदं
निखिलं हि विश्वं चिद्रं चिदात्मनियदास्तमु -
पेति शश्वत् । स्वं चितिरूपोव यं संस्थिततत्वा -
दुक्तो निरस्तकरणं परम समाधि : ।। स्वातन्त्र्याय -
शक्ति क्रमसंसिसृक्षा क्रमात्मता चेति विश्वो -
विभूति : । तदेव देवी क्रममन्तरास्तामनुत्तरं
मे प्रथयत्स्वरूपम ।। परं परस्थं गहनादनादि -
मेकं निविष्टं बहुधा गुहासु । सर्वालयं सर्वचरा -
चरस्थं त्वामेवशम्भुं शरणं प्रपद्ये ।।
क्लेशान् विनाश्य विकासय हृत्सरोजमोजो
विजृम्भय निजं नरि षड्भु , चेत स्वकीर चिति -
चन्द्रमरीचिचक्रमाचम्य स्म्यगमृतीकुरु विश्व -
मेतत् ।। प्रकाशमाने परमार्थभा नौ नश्यत्य -
विद्यातिमिरे समस्ते । तदा बुधो निर्मलदृष्टयो -
ऽपि किञ्चिन्न पश्यन्ति भवप्रपन्चम् ।। प्रकाश -
मानं न पृथक् प्रकाशात् च प्रका शो न पृथक्

विमर्शशक्ति । नान्यो विमर्शाद्धमिति स्वरूपादहं
विमर्शी स्मि चिदेकरूपा : ।। भवन्मयस्वात्म -
निवासलब्ध सम्पद्राम्यार्चितयुष्मदङ्घ्रि ।
न भोजनाच्छादनमप्यजस्त्र मपेक्ष ते यस्तमहं
नमामि ।। निमानि मौ हा जितसङ्गदोषा अध्यात्म -
नित्या विनिवृत्तकामा : द्वन्द्वैर्विमुक्ता : सुख दुख -
संज्ञैर्गच्छन्त्यमूढा : पदमव्ययं तत् ।। सर्वस्य चाहं
हृदि सन्निविष्ठो मत: स्मृति ज्ञानमपोहनं च ।
वेदैश्च सर्वैरहमेव वेद्यो वेदान्तकृद्वेदविदेव चाहम् ।।
कौलावलीनिवानन्दघनौघरूपामुन्मेषमेयोभयभा -
जयन्त: । निलीयते नील कुलालये या तां
सृष्टिकालीं सततं नमामि ।। १ ।।
000
वीरेन्द्रकालाग्नि -
महाविनोदार्पित मातृचक्रं
पान सक्तम् । रक्तीकृतं च प्रलयोत्थये तां
नमामि विश्वाकृतिरक्त कालीम् ।। २ ।।
वाजिन्य स्वीकृतवात चक्र, प्रकान्त सद्वृगमा -
गमस्थाम् । शुचिर्यास्तं गमितोर्चिषा तां शान्तीं
नमामि स्थिति नाशकालीम् ।। ३ ।।
000

सवार्थिसङ्घर्षिणा संयमस्य यमस्य यन्तुर्जगतो
यमाय । वपुर्महाग्रासविलासरागात् सङ्घर्षयन्ती
प्रणमामि कालीम् ।। ४ ।।

000

उन्मन्यनन्ता निखिलार्थगर्भा या भावसंहार -
निमेषमेति । सदोदिता सत्युद याय शून्यां
संहारकालीं मुदिता नम ा मि ।। ५ ।।
ममेत्यहङ्कार कला कलाप विस्फा र हर्षाद्र त -
गर्व मृत्यु : ग्रस्तो यया घस्मरसंविदंतां नमा -
म्यकालोचित मृत्यु कालीम ।। ६ ।।
विश्वं गहा कल्पविराम कल्पभवान्तभीम -
भृकुटिं भ्रमय्या । याश्नात्यनन्त प्रभवाचि -
ष तां नमामि भद्रां शुभभद्रकालीम् ।। ७ ।।

000

मातण्डमापीत पतङ्गचक्र, पतङ्ग वत्काल कले -
न्धानाय । करोति या विश्वरसान्तकान्तां मा -
तण्डकालीं सततं प्रणौ मि ।। ८ ।।

अस्तोदित द्वादश भा नु भाजि यस्यां गता भर्ग - 000
शिखा शिखेव । प्रशान्तधाम्नि धुतिनाशमेति
ता नौम्यनन्तां परमा कै कालीम् ।। ९ ।।

कालक्रमा कान्त दिनेशचक्र कोडीकृतान्ताग्नि -
कलाप उग्रः । कालाग्नि रुद्रो लयमेति यस्यां
तां नौमि कालानल रुद्रकालीम् ।। १० ।।
नक्त महाभूतलये श्मशाने दिक्रेमरी चक्र -
गणेन साकम् । काली महाकालमलंग्रसन्तीं
वन्दे ह्यचिन्त्यामनिलान ला भा म् ।। ११ ।।

कैमत्र्यत्वाष्ट्र मरीचि चक्र सन्चार चातुर्य तुरीय
सत्ताम् । वन्दे महा भैरव घोर चण्ड कालीं कलाकाश -
शशाङ्क कान्तिम् ।। १२ ।।

विद्यां परां कतिचिदम्बरमम्बा केचिदानन्दमेव
कतिचित् कतिचिच्च मायाम् । त्वां विश्वमाहुरपरे
वयमामनाम साक्षादपारकरुणां गुरुमूर्तिमेव ।।
ब्रह्मेन्द्ररुद्र हरिचन्द, सहस्त्र रश्मि स्कन्द त्रिपानन -
हुता शन वन्दिताये । वागीश्वरि : त्रिभुवनेश्वरि । विश्व -
मातरन्तर्वहिश्च कृतसंस्थित्रये नमस्ते ।।

प्रोहित धौम्येन [illegible] पाठ की आराधना
पढ़ीत [illegible] सूर्य के एक
सौ आठ नाम [illegible] सावधान होकर
श्रवन करो। सुर्य, [illegible], मंजुल, वपु,
पुषा, अर्क, सविता, [illegible], गभस्ती, अज्ज,
काल, मृत्यु, धाता, प्रभाकर, पृथ्वी, जल
तेज वायु, आकाश स्वस्रा, सोम, बृहस्पति,
शुक्र, बुध, मंगल, इन्द्र, विवस्वान,
दीप्तांशु, शुचि, सौर, शनैश्चर, ब्रह्मा,
विश्णु, रुद्र, स्कन्द, वस्तु, वैद्युत, जाठर
जठर अग्नि, ईन्धन अग्नि, तेजस्पति
वेधकर्ता, वेद्यांग, वेदवाहन, सत्य, शौच
व्रातर, शौच, केला, काष्ठा, मुहुर्त, पक्ष
याम, क्षण, संवत्सरकर, अश्वत्थ, कालचक्र,
विभावसु, शाश्वत, पुरुष, योगी व्यक्त
अव्यक्त, सनातन, काल, मृत्यु, प्रजाध्यक्ष
विश्वकर्मा, तमोनुद [illegible] वेदकार
[illegible], जीमुत, जीवन, अरिहा,

ओं

व्याप्त चराचरभावविशेषं चिन्मयमेकमनन्तम् -
नादिम् । भैरव नाथमनाथ शरण्यं त्वन्मयचिततया
हृदिवन्दे ।। १ ।। त्वन्मयमेतदशेषमिदं नो भाति
मम त्वदनुग्रह शक्तया । त्वं च महेश सदैव ममा -
त्मा स्वात्ममयं मम तेन समस्तम् ।। २ ।।
स्वात्मनि विश्वगते त्वयि नाथे तेन न संसृतिभीति -
कथाहित । सत्सवपि दुःख विमोह कराय विदायिषु
कर्मगणेषु ।। ३ ।। अन्तकाल मां प्रतिमा दृशमेनां क्रोधकरालतमां
विदधेहि । शङ्करसेवनचिन्तन घोरो भीषण भैरव शा क्ति -
म्यो ऽस्मि ।। ४ ।। इत्यमुपोढ भवन्मय संविद्बोधिति दारित -
भूरितमिस्त्र : । मृत्युयमान्तक कर्मपिशाचनाथै : नमो -
ऽस्तु न जातु बिभेमि ।। ५ ।। प्रोदित सत्यविबोधमरीचि:
प्रोत्तितविश्व पदार्थ सतत्व : । भाव परामृतनिर्भरपूर्ण :
त्व यहमात्मनि विवृतिमेमि ।। ६ ।। मान सगोचरमेति
यदेव क्लेशदशा तनु ता पविधात्री । नाथ । तदेव मम
त्वदभेदस्तोत्र परामृतवृष्टिरुदेति ।। ७ ।। शङ्कर सत्यमिदं
व्रतदानस्नान तपोभव ताप विनाशि । तावक शास्व -
परा मृत चिन्ता सिन्धति चेतसि निर्वृति धारा ।। ८ ।।

मुक्तात्मने, मुक्तात्मने नमोनमः कृत,
सर्वज्ञ, [illegible] विभु, अनंतानंत
अनंत, केवल [illegible] काय, सर्वोत्तम
ज्ञान विशारत, वर सर्वज्ञान वेदिता
ज्ञान, सर्वज्ञा, मूलाय, शीघ्रग, प्राणधार
धन्वन्तर, धूमकेतु, आदिदेव आदिपुत्र,
धर्मात्मा, अरिष्टघ्नी, ज्ञानविद्या,
विद्यानिधि, स्वस्तप, सर्वज्ञद्वार, पुरद्वार
मोक्षद्वार, त्रिविष्टप, सद्गति, [illegible]
पुराणात्मा, विश्वात्मा, विश्वनायक
वरावरात्मा, सुक्ष्मात्मा, मैत्रेय
करुणाभिवंत: दामोदर, यह सूत्र के
~~उत्तरार्ध~~ 108 नाम है इन नामों में
ॐ ओंकार के, को नमस्कार करना चाहिए,
आप सारे जगत के देव है समस्त
प्राणियों के आत्मा अच्छी ही
स्तवन प्राणियों का फल कारण है।

नृत्यति गायति हृष्यति गाढं संविदियं मम
भैरवनाथः त्वां प्रियमाप्य सुदर्शनमेकं दुर्लभम -
न्यजनैः समयज्ञम् ।। ६ ।। वसुरसपौर्ण कृष्ण दश -
म्यामिव गुप्तः स्तवमिमनकरोत् । येन विभ् -
भवमरु सन्ता पं शमयति कृष्णे जनस्य दया -
लुः ।। १० ।। येन विभुर्भव ---
हरिरेव जाज्जगदेव हरि हरिता जगतो न हिमि -
न्मणुः । इतियस्य मतिः परमार्थ गतिः सनरो
भवसागरमुरति ।। श्रादावन्ते चि द्रसरूपं मध्ये
चिद्रस वुदुरूपम् । भातं भातं भारूपं स्यान्नो
भातं चेन्नितरां न स्यात् ।।

ओं शन्नो मित्र शंवरुणः शन्नो भवत्वर्यमा । शन्न
इन्द्रो बृहस्पतिः शन्नो विष्णुरुरुक्रमः । नमो ब्रह्मणे
नमो वायवे नमस्ते वायो त्वमेव प्रत्यक्षं ब्रह्मासि ।
त्वामेव प्रत्यक्षं ब्रह्म वदिष्यामि ऋतं वदिष्यामि
सत्यं वदिष्यामि तन्मामवतु तद्वक्तारमवतु
अवतु मामवतु वक्तारम् । शान्तिः शान्तिः शान्तिः

आप मोक्ष के [illegible] हैं। आप
अचक्षु आँख [illegible] अंध हैं। आप
ही समस्त [illegible] के मूल कारण हैं।
आप Path Path सभी सत्वों के
प्रतिशयों के रक्षक हैं। आप मेरा
गतोरथ पूर्ण कीजिए। मेरी अभिलाषा
पूरा कीजिए।

सहनाववतु सहनौ भुनक्तु सहवीर्यं करवाव है ।
तेजस्विनावधीतमस्तु मा विद्विषावहै ।
शान्ति : शान्ति : शान्ति : ।।
ओं शन्नो मित्र शंवरुण : शन्नो भवत्वर्यमा ।
शन्न इन्द्रश्चाग्निश्च शन्नो विष्णुरुरुक्रमा । नमो
ब्रह्मणे नमो वायवे नमस्ते वायो त्वमेव प्रत्यक्षं
ब्रह्माप्ति । त्वामेव प्रत्यक्षं ब्रह्म अवादिषं कृतमवा -
दिषं सत्यमवादिषं तन्मामावी च वक्तारमावीदा -
वीन्मामावीत् वक्तारम् । शान्ति : शान्ति : शान्ति : ।।
सहनाववतु सहनौ भुनक्तु सहवीर्यं करवाव है ।
तेजस्विनावधीतमस्तु मा विद्विषावहै । शान्ति :
शान्ति : शान्ति ।।
यतो वा इमानि भूतानि जायन्ते येन जातानि
जीवन्ति यं प्रयान्ति अभिसंविशन्ति तज्जिज्ञा -
सस्व तदेव ब्रह्म ।।
सतो वा इमानि भूतानि जायन्ते सति जा तानि
जीवन्ति सन्तं प्रयान्ति अभिसंविशन्ति सदेव
ब्रह्म ।।

चितौ वा इमानि भूतानि जायन्ते चिति जातानि
जीवन्ति चितं प्रयान्ति अभिसंविशान्ति चिदेव ब्रह्म ।
आनन्दात्खलु इमानि भूतानि जायन्ते आनन्देन
जातानि जीवन्ति आनन्दं प्रयान्ति अभिसंविशान्ति
आनन्दं ब्रह्म । मतोवा इमानि भूतानि जायन्ते मयि जा -
तानि जीवन्ति मां प्रयान्ति अभिसंविशान्ति महमेव ब्रह्मा ।।
आत्मक्रीडा आत्मरुचि : क्रियावान् य एव ब्रह्म विद्वान
वरिष्ट : यमेवैष वृणुते तेनलभ्य : तस्यैष आत्मा विवृ -
णुतेतनुं स्वाम् ।। आत्मक्रीडा - - - - - ।।

ooo

ददातीष्टान्भोगान् क्षपयति रिपून् हन्ति विपदो
दहत्याधीन्व्याधीन शमयति सुखानि प्रतनुते ।
हठादन्तर्दुःखं दलयति पिनष्टीष्ट विरहम् ।
सकृद्ध्याता देवी किमिव निरवद्यं न कुरुते ।।
ददातीष्ठानभोगान् --------

ooo

सुधासिन्धोर्मध्ये सुरविटपवाटी परिवृते
मणिद्वीपे नीपोपवनवति चिन्तामणि गृहे ।
शिवाकारे मन्चे परमशिवपर्यङ्कनिलयां
भजन्तित्वां धन्या : कतिचन चिदानन्दलहरीम् ।।

मनुष्यास्तिर्यञ्चो मरुत इति लोकत्रयमिदम्
भवाम्भोधौ मग्नं त्रिगुण लहरी कोटि लुठितम् ।।
कटाक्षश्चेदत्र : कनक तव मातः करुणया ।
शरीरी सद्यो यं व्रजति परमानन्द तनुताम् ।। ०००

तडिद्वल्लीं नित्यामृत सरितं पाररहितां
मलोचीर्णां ज्योत्स्नां प्रकृतिमगुण ग्रन्थिहननाम् ।
गिरामं दूरां विद्यामविनतं कुचां विश्वजननीम् ।।
अपर्यन्तां लक्ष्मीमभिदधति सन्तो भगवतीम् ।।
असद्वंच प्राचीनैर्जनानि जनने : कर्मविलयात् ।
गते जन्मान्यन्तं गुरु वपुषमासाद्यगिरिशम् ।
अवज्ञां शर्वी कृतनुरपि त्वां विदित वान्
नयेयस्त्वत्पूजा स्तुति विरचनैरेव दिवसान् ।। ००८

प्रसन्नक चितं दयासान्दमन्तः प्रकाशं हितं श्री शिव -
प्रेष्ट गोत्रम् । शिवाद्वैतसिद्धान्तविश्वान्ति क्षेत्रं स्वतंत्रं
भजेसद्गुरुं राम चन्द्रम् ।। स्वदालोकनान्नान्यदालोक -
नीयं समालोक्यते लोक बाह्यावलोकः अलोकं हि
लोक स्वभावानुकूलंस्वतंत्र भजे सद्गुरुं रुद्रमूर्तिं ।।
पठेदष्टकं सद्गुरोस्त्रय्यत्तमूर्ति स्तथाय : पुमान् श्रद्धया
संशणोति । तदीयानु कम्पावशाच्छीघ्रमेवभजस्त्रं
स्वसाम्राज्यतामाप्नुयात्स : ।।

:::::::::::::::::::::

परां च पूर्णत्रिंशत्कां मध्यमां वर्णरूपिणीम्
पर प्रकाशव पुंसं वन्देभट्टा रकं गुरुम् ।।
लौकिकव्यवहारे पि त्रि पदा व्यभिचारिणीम् ।
वेतक्यात्व सम्पन्नं वन्दे चिद्वैरवं गुरुम् ।।
त्रि तयभोगिनं वन्दे वीरेशं वोमि सर्वगम् ।
चक्रेश्वर समाधिस्थं गुरुं वन्दे महाहृदम् ।।
कृता संवित्स्वरूपेण स्तुति : गुरु प्रसादत : ।
यस्या : पठन मात्रेण शिवतुल्यो भवेन्नर : ।।

ooo

नन्दन्तु साधका : सर्वेविनश्यन्तु विदूषका : ।
अवस्था शाम्भवी ने स्तु प्रसन्नोऽस्तु गुरु : सदा ।।
राजस्वहित प्रजास्वस्ति देशस्वस्ति तथैवच ।
यजमानगृहे स्वस्ति स्वस्ति गो ब्राह्मणेषुच ।।
नमामि यामिनी नाथ लेखालङ्कृत कुन्तलाम् ।
भवानीं भवसन्ताप निर्वापण सुधानदीम् ।।

313

dans

1 —

2 —

3 —

4 —

जवाहर लाल कौल
श्रीनगर
१०८